# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा, एप्रिल-२०१६

**कक्षा - शास्त्री-१ ( Sem_2 )** **प्रश्नपत्र-६** **गुणाः - ७०**

**विषयः - पुराणेतिहासः** CC 1.2.4 **समयः - ११:०० तः ०२:००**

**दिनाङ्कः - २३-०४-२०१६** **सन्दर्भग्रन्थः - वाल्मीकीयरामायणे सुन्दरकाण्डे-३५ तः ६८ सर्गाः**

---

### युनिट-१

**प्रश्नः -१ अधस्तनेषु कयोरपि द्वयोः श्लोकयोः ससन्दर्भप्रसङ्गं विलिख्य संस्कृते भावार्थो लेख्यः ।** ०८

*(१) यानि रामस्य चिह्नानि लक्ष्मणस्य च वानर ।*
*तानि भूयः समाचक्ष्व न मां शोकः समाविशेत् ॥*

*(२) प्रत्ययार्थं तवानीतं तेन दत्तं महात्मना ।*
*समाश्वसिहि भद्रं ते क्षीणदुःखफला ह्यसि ॥*

*(३) एष चूडामणिर्दिव्यो मया सुपरिरक्षितः ।*
*एतं दृष्ट्वा प्रहृष्यामि व्यसने त्वामिवानध ॥*

**प्रश्नः -२ कस्याप्येकस्योत्तरं विस्तरेण लिख्यताम् ।** ०८

*(१) सीतया हनुमते कथितः काकप्रसङ्गः ।*

*(२) यथाग्रन्थं श्रीरामवर्णनं क्रियताम् ।*

**प्रश्नः -३ द्वयोः टिप्पणी कार्या ।** ०४

*(१) चूडामणिदानम् ।* *(२) सीतायाः शोकः ।*

*(३) हनुमतः पराक्रमः ।* *(४) श्रीरामः ।*

**प्रश्नः -४ अधोलिखितेषु पञ्चानामुत्तराणि लिखत ।** ०५

*(१) रामायणे कति काण्डाः सन्ति ?*

*(२) सुन्दरकाण्डे कति सर्गाः सन्ति ?*

*(३) हनुमतः एकम् अपरं नाम लिखत ।*

*(४) लङ्कासमीपे कः पर्वतः अस्ति ?*

*(५) हनुमता लङ्कायां कः पराक्रमः कृतः ?*

*(६) केन रूपेण हनुमान् लङ्कां प्रविशति ?*

### युनिट-२

**प्रश्नः -५ अधस्तनेषु कयोरपि द्वयोः श्लोकयोः ससन्दर्भ प्रसङ्गपूर्वकं व्याख्यानं विधीयताम् ।** ०८

*(१) स जातमन्युः प्रसमीक्ष्यविक्रमं स्थितः स्थिरः सज्यति दुर्निवारणम् ।*
*समाहितात्मा हनुमन्तसाहवे प्रचोदयामास शितैः शरैस्त्रिभिः ॥*

*(२) ततः पैतामहं वीरः सोऽस्त्रमस्त्रविदां वरः ।*
*संदधे सुमहातेजास्तं हरिप्रवरं प्रति ॥*

*(३) कश्च लक्ष्मणमुक्तानां रामकोपानुवर्तिनाम् ।*
*शराणामग्रतः स्थातुं शक्तो देवासुरेष्वपि ॥*

**प्रश्नः -६ कस्याप्येकस्य सविस्तरेणोत्तरं लिखत ।** ०८

*(१) मन्त्रिणां सप्तपुत्राणां वधः ।* *(२) हनुमदिन्द्रजितोः युद्धप्रसङ्गः वर्णनीयः ।*

**प्रश्नः -७ एकां टिप्पणीं लिखत ।** ०२

*(१) रावणस्यान्तः पुरम् ।* *(२) अशोकवाटिका ।*

**प्रश्नः -८ निम्नलिखितयोः एकस्य पात्रपरिचयो देयः ।** ०२

*(१) दशाननः ।* *(२) मन्दोदरी ।*

**युनिट-३**

**प्रश्नः -९ अधस्तनेषु कयोरपि द्वयोः श्लोकयोः ससन्दर्भप्रसङ्गं विलिख्य संस्कृते भावार्थो लेख्यः ।** ०८

*(१) रक्ष्यमाणा सुघोराभी राक्षसीभिरनिन्दिता ।*
*एकवेणीधरा बाला रामदर्शनलालसा ॥*

*(२) ततः सीतामयश्यंस्तु रावणस्य निवेशने ।*
*शोकसागरमासाद्य न पारमुपलक्षये ॥*

*(३) अगच्छं जानकीं सीतां मार्गमाणो दिदृक्षया ।*
*तत्र लङ्केति नगरी रावणस्य दुरात्मनः ॥*

**प्रश्नः -१० कयोश्चित् द्वयोः सूक्तयोः सन्दर्भप्रसङ्गपूर्वकं स्पष्टीकरणं कुरुत ।** ०४

*(१) न त्वं रामस्य सदृशो दास्येऽप्यस्य न युज्यसे ।*

*(२) सर्वथा कृतकार्योऽसौ हनूमान् नात्रः संशयः ।*

*(३) कार्यसिद्धिर्हनुमति ।*

*(४) न दूतो वधमर्हति ।*

**प्रश्नः -११ कस्याप्येकस्योत्तरं विस्तरेण दीयताम् ।** ०८

*(१) हनूमत्कृतचैत्यप्रासादविध्वंसः वर्णनीयः ।*

*(२) हनुमता कथितः सीतासन्देशः ।*

**प्रश्नः -१२ पञ्चानां लघूत्तराणि लिखत ।** ०५

*(१) द्वितीयसत्रे कति सर्गाः अभ्यासक्रमे ?*

*(२) हनुमतः बन्धनं कः करोति ?*

*(३) सीतासमीपे का दासी न्यवसत् ?*

*(४) रावणस्य पुत्रयोर्नाम किमासीत् ?*

*(५) सीता हनुमते किं ददाति ?*

*(६) लङ्का केन धातुना निर्मिता आसीत् ?*

*(७) रावणान्तःपुरे का न दृश्यते ?*

---------------------